श्रीराष्ट्रगुरुसहस्रनामस्तोत्रम्

रचयिता

डा० शिवदत्त शर्मा चतुर्वेदः

Rs 0 5

प्रकाशक :
संस्कृतपरिषद्, पीताम्बरापीठ
दतिया (म० प्र०)

श्रीराष्ट्रगुरुसहस्रनामस्तोत्रम्

रचयिता
डा० शिवदत्तशर्मा चतुर्वेदः

प्रकाशक :
संस्कृतपरिषद्, पीताम्बरापीठ
दतिया (म० प्र०)

प्रकाशक :—
संस्कृतपरिषद् पीताम्बरापीठ
दतिया (म० प्र०)

मूल्य २)००

प्रथम संस्करण—१००० प्रतियाँ

मुद्रक :—
मधुसूदन प्रेस
भदैनी, वाराणसी।
फोन । ५६३६२

प्रकाशकीय

ब्रह्मलीन पूज्यपाद राष्ट्रगुरु श्री पीताम्बरापीठाधीश्वर श्री स्वामी जी महाराज के विग्रह स्थापना पर प्रकाशित "श्री राष्ट्रगुरु सहस्रनाम स्तोत्र" के द्वारा श्री पीताम्बरापीठ संस्कृत परिषद् श्री गुरु चरणों में श्रद्धासुमन अर्पित करती है।

इसके प्रणेता आश्रम के ही अभिन्न अंग, काशी हि० वि० विद्यालय में सं० प्राध्यापक एवं भारत के गौरव भूत विद्वान् स्वर्गीय महामहोपाध्याय श्री गिरधर शर्मा जी के पुत्र पं० शिवदत्त शर्मा चतुर्वेदी हैं। आपने पहिले पूज्यपाद के विषय में महाकाव्य रचने का विचार किया था महाकाव्य का प्रारम्भ भी कर दिया था किन्तु उससमय उनको कुछ ऐसी अनुभूतियाँ हुई कि वे राष्ट्रगुरु सहस्रनाम संकलन की ओर मुड़ गये और पूज्य गुरुदेव की कृपा से इस कार्य में पूर्ण सफल भी हो गये। वास्तव में यह सहस्रनाम ही महाकाव्य का रूप है। इसमें पूज्यपाद के समस्त वैशिष्टच संकेत रूप में समाहित हैं। बड़े सुन्दर और प्रमाणिक रूप से सहस्रनाम प्रणयन के लिये पीताम्बरा पीठ के समस्त साधक पं० शिवदत्तशर्मा चतुर्वेदी जी के आभारी हैं।

ग्रन्थ प्रणयन के प्रेरक एवं प्रकाशन का समस्त व्ययभार वहन कर्त्ता वैद्यनाथ आयुर्वेद भवन नागपुर के निर्देशक पं० श्री शिवनाथ शर्मा हैं। मैं परिषद् की ओर से उनको साधुवाद देता हूँ।

आशा है यह सहस्रनाम साधक समुदाय में समाहत होगा।

अक्षयतृतीया
२०४१

भवदीय
ललिता प्रसाद शास्त्री
मन्त्री
श्री पीताम्बरापीठ संस्कृत परिषद, दतिया



ब्रह्मलीन
श्री पीताम्बरा पीठाधीश्वर राष्ट्रगुरु परमपूज्य अनन्तश्री श्री स्वामी जी महाराज, वनखण्डेश्वर, दतिया (म० प्र०)

श्रीराष्ट्रगुरुसहस्रनामस्तोत्रम्

ध्यानम्

विदलित सर्वविकारं निगमागमसारसंचितं पुण्यम् ।
पूर्वपुरुषभणितीनां सर्वस्वं सद्गुरुं वन्दे ॥१॥
अणुतमदोषलवानां दूरीकरणेऽपि सावधानं तम् ।
शिष्यजनकल्पवृक्षं सद्गुरुमीडे प्रभादीप्तम् ॥२॥
धर्मसरणिमारूढं मनसा वाचाऽथ कायेन ।
वितरन् दीक्षां विपुलां सद्गुरुमीडे विधातारम् ॥३॥
गणनातीतैर्मार्गैः संचरणेषु स्वतन्त्रतामाप्तम् ।
योगविनिर्जितकायं श्रीगुरुवर्यं समाश्रये नित्यम् ॥४॥
अस्तव्यस्तदशायामाशाजागर्तिदातारम् ।
निजदारिद्र्यविनाशे स्मृतिमात्रौषधमयं वन्दे ॥५॥
पीताम्बराख्यपीठे दतियानगरे जगद्वन्द्यम् ।
राष्ट्रगुरुं जगदम्बापूजानिरतं समाश्रये शक्तम् ॥६॥

श्रीराष्ट्रगुरुसहस्रनामस्तोत्रम्

पीताम्बरापीठपतिः परमोदारविग्रहः ।
समस्तविद्यानिष्णातः सर्वसिद्धिधुरन्धरः ॥१॥
आगमोपायनिपुणो नित्यसेवापरायणः ।
तपःस्वाध्यायकुशलो भक्ताभीष्टप्रदः शिवः ॥२॥
कोटिगाथाप्रगीतश्च तन्त्रोद्धारणतत्परः ।
महाप्रभावो राजर्षिपूज्यो मानधुरन्धरः ॥३॥

दतियावासभूयिष्ठो दतियाभूप्रतिष्ठितः ।
दतियाख्यापको दाता दन्तवक्त्रपुरीप्रभुः ॥४॥
निर्व्याजस्नेहसम्पूर्णो जगन्मातृजपे रतः ।
ज्ञानिनामग्रगण्यस्तु वेदवेदाङ्गपारगः ॥५॥

ऋग्वेदनिपुणो यजुर्वेदशूरो सामप्रगायकः ।
आथर्वणे चतुर्थे च सविशेषं प्रतिष्ठितः ॥६॥
आयुर्वेदविदांवर्यो मल्लविद्याविधारकः ।
गान्धर्वविद्यानिपुणो श्रेष्ठगायकमानितः ॥७॥
ज्योतिर्विद्यासमारूढो तन्त्रपञ्चाङ्गदायकः ।
शब्दविद्याप्रवीणश्च प्राकृतेषु प्रतिष्ठितः ॥८॥

पालिभाषासु निष्णातो संस्कृते मार्गदेशिकः ।
हिन्दीभाषानायकोऽथ उर्दूभाषासु कोविदः ॥९॥
आंग्लभाषाप्रवीणस्तु सर्वभाषाविशारदः ।
शिक्षाशास्त्रेषु निष्णातो शिक्षामार्गप्रवर्तकः ॥१०॥
तन्त्रविद्याप्रदानाय कृतभूरिपरिश्रमः ।
नारदीयसमाख्यातशिक्षाग्रन्थप्रकाशकः ॥११॥

कल्पग्रन्थेषु कुशलो कल्पग्रन्थसमीक्षकः ।
कल्पाचार्यो कल्पकर्ता कल्पकल्पनकोविदः[५०] ॥१२॥
भक्तानां नित्यसक्तानां दीनानां कल्पपादपः ।
कल्पनासुन्दरीकान्तः कलाभिर्नित्यमण्डितः ॥१३॥

कल्पनापूजितः कामपूरकः कामवर्षकः ।
वेदाङ्गकल्पशास्त्राणां वारिधिर्गुणमण्डितः ॥१४॥

वैयाकरणसिद्धान्तसौख्यसारसमादृतः ।
पाणिनीये सूत्रमार्गे सुसञ्चारणकौतुकः ॥१५॥
पातञ्जले महाभाष्ये प्राथम्येन प्रतिष्ठितः ।
भट्टोजिदीक्षितादीनां ग्रन्थेषु परिनिष्ठितः ॥१६॥
जैनव्याकरणादीनां सम्पूर्णनयकोविदः ।
कण्ठाग्रग्रथिताऽशेषकोशग्रन्थधुरन्धरः ॥१७॥
मीमांसासु लसत्प्रज्ञः सर्ववादप्रतिष्ठितः ।
निगमागमसंसारसंचारणकृतश्रमः ॥१८॥
आगमेषु कृतारम्भः सर्वलोकनमस्कृतः ।
समयाचारसन्मार्गरहस्योद्घाटनोन्मुखः ॥१९॥
सप्तविंशतिमन्त्रार्थपरिवेशविशेषकः ।
शाक्तसिद्धान्ततत्त्वज्ञो शक्तिमूलत्वघोषकः ॥२०॥
सर्वोपनिषद्भाष्यप्रणेता जितषड्रिपुः ।
विलुप्ततन्त्रसिद्धान्ताऽविष्कारणकृतोद्यमः ॥२१॥
सर्वसाधनसम्पन्नो निष्ठाजागरणोद्यतः ।
लक्षलक्षजनाऽनन्ददायको मन्त्रदीक्षकः ॥२२॥
स्वयं तुष्टो लसत्प्रज्ञः सर्वकामप्रपूजितः ।
सर्वविद्वत्समाराध्यो मातृसेवापरायणः ॥२३॥
दतियापीठसंस्थोऽपि सर्वभारतरक्षकः ।
नानाशिष्यसमुद्घुष्टयशोराशिविराजितः ॥२४॥
श्रीकृष्णः श्रीशिवः साक्षात् सर्वयोगीश्वरो विभुः ।
पीताम्बराभगवतीनित्यार्चनपरायणः ॥२५॥
शान्तिप्रियो शान्तिमार्गप्रदाता भाग्यदायकः ।
भाग्यनिर्माणकर्ता च भाग्यबाधाविनाशकः ॥२६॥
सौभाग्यलालितो नित्यं सर्वभाग्यप्रपूजितः ।
६००
महामहिममेधावी सर्वापत्तिविनाशनः ॥२७॥
शिष्यप्रियो शिष्यपूज्यो शिष्यशिक्षणतत्परः ।
देशस्य सर्वसामान्यविद्वज्जनसमादृतः ॥२८॥
चराचरनुतः कामं स्वयं सर्वप्रदः शुचिः ।
योगविद् योगपरमो योगकारणसंगतः ॥२९॥
योगगम्यो योगिनम्यो योगिसेव्यः सतां गतिः ।
योगासनसमारूढसर्वज्ञानपरिष्कृतः ॥३०॥

महाप्राज्ञो महौजस्वी मनोवाक्कायसंस्तुतः ।
परमो वेदितव्योऽथ सेवासनसमीडितः ॥३१॥
वाग्मी विदांवरेण्योऽथ लोकाऽनुग्रहतत्परः ।
प्रवर्तितप्रकृष्टोच्चशोभासंभारभास्वरः ॥३२॥
जगदम्बासमर्चायामत्यन्तविकसद्रुचिः ।
नित्यपूजनपर्यायनेपथ्यप्रथितो गुरुः ॥३३॥
सर्वदर्शनसिद्धान्ततत्त्वपूजनतत्परः ।
एतद्देशप्रसूतानां पूज्यैः पूज्यतमो गुरुः ॥३४॥
महामनस्वी मेधावी सर्वधर्मार्चने रतः ।
कृतप्रतिज्ञः प्रणयी प्राणवान् प्राणपूजितः ॥३५॥
धर्माचार्यो धर्ममर्मोपदेष्टा नयकोविदः ।
लक्षलक्षजनानन्ददायको नित्यनिर्मलः ॥३६॥
श्रीमत्परशुरामाङ्घ्रिप्रणतो वीरदेशिकः ।
रेणुकातन्त्रनिष्णातः स्वरोदयकृतश्रमः ॥३७॥
दतियाऽऽवासभूयिष्ठः कृतभारतदर्शनः ।
वाराणसीवासमयो वाराणस्यां समाहितः[१५०] ॥३८॥
हिमालये पञ्चनदे तन्त्रप्रेरणकामुकः ।
निरञ्जनो निर्विकल्पध्यानसन्धानभास्वरः ॥३९॥
जगन्मातुश्चरणयोः पूजाप्रथनकौतुकी ।
शिष्यसंघैः समाकीर्णो मातृपूजापरायणः ॥४०॥
पीताम्बरापादपद्मप्रणतो मातृवत्सलः ।
कोविदानामग्रगण्यः सर्वोपायविशारदः ॥४१॥
शिष्याणां नित्यसक्तानां सर्वसौभाग्यवर्षकः ।
अध्यात्मविद्याप्रणयी तपस्वी वाग्विदांवरः ॥४२॥
धूमावती भगवती ध्यानस्तोत्रप्रियो महान् ।
चीनाऽक्रमणवेलायां धूमाऽनुष्ठानतत्परः ॥४३॥
चीनमीनोत्तापहारी चीनपेषणकौतुकी ।
चीनयुद्धप्रतीकारप्रयोगपरिनिष्ठितः ॥४४॥
धूमावती-भगवती-संस्थापन-समीडितः ।
सर्वबाधाप्रशमनो धूमापूजाव्रती शुचिः ॥४५॥
श्रीमत्परशुरामाऽङ्घ्रिपूजनोत्सुकमानसः ।
गणेशपूजको श्रीमद्हनुमद्भक्तिमण्डितः ॥४६॥

शिवपूजारतो ब्रह्मा सर्वदेवसमीडितः ।
शिवाऽभिषेकसंभारप्रेमसंसारनन्दितः ॥४७॥
श्रीभैरवप्रतिष्ठायां सम्यङ्मार्गस्य देशिकः ।
हनुमद्भक्तिसंतुष्टो सर्वदेवप्रपूजकः ॥४८॥
सर्वदेवध्यानरतो बगलासेवने रतः ।
बगलामुखी-भगवती-नित्य-सेवा-परायणः ॥४९॥
भक्तापत्ति-प्रतीकार-चेष्टासु विहितादरः ।
नानाभक्तसमाकीर्णो नित्यस्वाध्यायमण्डितः ।५०॥
वेदप्रियो वेदवेत्ता महर्षिवेदपूजकः ।
वेदोपदेशकुशलो वेदसंस्कारकारकः ॥५१॥
वेदतत्त्वार्थनिष्णातो वेदपारायणप्रियः ।
वेदागमानां नित्यानां नित्यसंयोजने रतः ॥५२॥
सर्वशास्त्रार्थनिष्णातः सर्वशास्त्रधुरन्धरः ।
२००
सदाचारोपदेष्टा च सत्यव्रतमयो महान् ॥५३॥
आभ्यन्तरशुचिर्बाह्यशुचिर्जपपरायणः ।
नानाविचारकुशलो नानातन्त्रप्रवर्तकः ॥५४॥
नानाभाषाविशेषज्ञो नानानिष्ठोपदेशकः ।
सर्वमानवभावाभिरामश्रीमनोहरः ॥५५॥
उच्चोच्चभावनानां वा सर्वमान्यः प्रवर्तकः ।
मातुः श्रीबगलामुख्याः क्रोडक्रीडनलालसः ॥५६॥
प्रोतुङ्गोत्तुङ्गशिखरप्रवर्तनपरायणः ।
समापितजगत्कृत्यो जगत्कल्याणकौतुकी ॥५७॥
छिन्नमस्तार्चनरतो मातङ्गीध्यानतत्परः ।
कालीकलामयो नित्यं ताराविभवनिर्भरः ॥५८॥
षोडषीतर्पणरतो सर्वतः परिनिष्ठितः ।
दीनानां दलितानां च समुद्धारणनिश्चयः ॥५९॥
दैन्यदैत्यवधाकाङ्क्षी यन्त्रार्चनचमत्कृतः ।
सर्वज्ञः सर्वसंवेत्ता सर्वेभ्यः करुणामयः ॥६०॥
नित्यप्रसन्नो भक्तानां सर्वापत्तिनिवारकः ।
सर्वत्रगतिमांल्लोके लोकान्तरगतो गुरुः ॥६१॥
ज्ञानविज्ञानधाराणां वारांनिधिरिव स्थितः ।
सप्तानां चिरजीवानां साक्षात्कारेषु साधकः ॥६२॥

निलिम्पवाणीसन्तुष्टो वेदोद्घोषप्रसादनः ।
वैदिकाचारसन्तुष्टो वेदमान्यविचारकः ॥६३॥
समाधिशूरो निर्द्वन्द्वः साक्षात्करणकौतुकी ।
सत्कारैरञ्चितो नित्यं विद्वत्सत्कारतत्परः ॥६४॥
ज्ञानविज्ञानधाराणां सच्छिष्येषु प्रवर्तकः ।
स्वसामर्थ्योन्नायकत्वोपदेष्टा जपदेशिकः ॥६५॥
नानासिद्धविधानेषु सन्मन्त्राणां प्रदायकः ।
सच्छिष्यशतसाहस्रसंकीर्णो दिव्यविग्रहः ॥६६॥
सर्वेश्वरीज्ञानमयो महामायासमर्चकः ।
२५०
सर्वाऽव्ययविरोधानामाभासत्वविधायकः ॥६७॥
क्रान्तदर्शी क्रान्तमना विक्रान्तः कान्तिमान् कविः ।
कल्पनाकामिनीकान्तः कल्पान्तयशसां निधिः ॥६८॥
मृत्युमारणविख्यातो मृत्युमातङ्गकेसरी ।
मृत्युञ्जयो मृत्युजेताऽमरतामार्गदेशिकः ॥६९॥
दीक्षाप्रदो दयापूर्णो पूर्णदीक्षाव्रतान्तरः ।
पूर्णः पूर्णतमो नित्यं पुराणपुरुषोत्तमः ॥७०॥
जनमन्त्रप्रदाता च पारसीमन्त्रदायकः ।
सिक्खानां मन्त्रदाता च मौलवीमन्त्रदायकः ॥७१॥
दीनानां दलितानां च दीक्षादाता दयाकरः ।
कृपाब्धिः सुकृपाधारी करुणावरुणालयः ॥७२॥
वसिष्ठो याज्ञवल्क्योऽसौ विश्वामित्रोऽथ गौतमः ।
वामदेवोऽथ कपिलो जमदग्निरमित्रजित् ॥७३॥
अत्रिरेवाऽङ्गिराः साक्षाद्वीणापाणिस्तु नारदः ।
गन्धर्वाधिपतिः साक्षात् कुबेरो वरुणो वशी ॥७४॥
इन्द्रोऽथ देवराड् नित्यमिन्द्रियाणां हितावहः ।
नियमानां यमश्चायं लोकपालश्च निश्छलः ॥७५॥
त्रिकालज्ञः कालयात्राव्रती कालधुरंधरः ।
सर्वज्ञो भूमिदेशज्ञः पुस्तकान्वेषणे रतः ॥७६॥
नानालिपिविशेषज्ञो शारदालिपिभासुरः ।
ब्राह्मीनिष्णात एवायमांग्लानां लिपिपूरकः ॥७७॥
उर्दू लिपिविशेषज्ञो पाञ्चाललिपिधारकः ।
कामचारी कामनेता कामनापूरणे रतः ॥७८॥

कायसिद्धिप्रवीणश्च कामकार्यसुनिश्चलः ।
योगाऽभ्यासरतो नित्यं प्राणायामपरायणः ॥७९॥
पूरके पूर्णरूपस्तु कुम्भके स्थितमानसः ।
अनेकदिनपर्यन्तं कुम्भके सुव्यवस्थितः ॥८०॥
रेचके सर्वनिःश्वासजनताशोकमोचनः ।
प्रत्याहारकृतारम्भः प्रत्याहारचमत्कृतः ॥८१॥
धारणायां सर्वधाराधारकोऽप्रतिमो बली ।
ध्यानेषु सावधानश्च समाधौ शूरमानसः ॥८२॥
३००
समाधौ परमेशानभावमात्रसुशोभनः ।
पातञ्जले योगमार्गे नित्यसंचारकौतुकी ॥८३॥
पतञ्जलिस्तुपरमो व्यासो वाणीविदांवरः ।
कर्तव्यदीक्षानिरतो जनकष्टनिवारकः ॥८४॥
पीताम्बराध्यानरतो जनबाधाविमोचकः ।
सिद्धमन्त्रसहस्राणां सहस्रेषु कृताऽस्पदः ॥८५॥
समयाऽचारतत्त्वज्ञो समयाचारनिष्ठितः ।
समयाचारसंसेवाव्रती समयपण्डितः ॥८६॥
समयेषु कृतारम्भः समयेषु समापकः ।
समये सर्वविद्यानां मन्त्राणां च प्रवर्तकः ॥८७॥
समयस्य परिज्ञाने गौराङ्गाणां प्रशंसकः ।
समयस्य सर्वसामान्यकारणत्वविघोषकः ॥८८॥
क्षणेषु सावधानोऽयं क्षणदाजपतत्परः ।
तन्त्रपञ्चाङ्गनिर्माता तन्त्रपंचाङ्गसुन्दरः ॥८९॥
तन्त्रपञ्चाङ्गतत्त्वानामुपदेष्टा सुनिर्मलः ।
अनुशासनतत्त्वज्ञो सानुशासनशासनः ॥९०॥
अनुशासनभूयिष्ठोह्यनुशासनपण्डितः ।
समये कार्यशीलो हि समये सर्ववन्दितः ॥९१॥
समयाचारनिष्णातो समसेवापरायणः ।
महानिशाजपपरो रात्रिजाप्यमनौ रतः ॥९२॥
ब्रह्मविद् ब्रह्मपरमो ब्रह्मचारी बृहत्परः ।
ब्रह्मतत्त्वैकनिलयो परे ब्रह्मणि संस्थितः ॥९३॥
परब्रह्मस्वरूपोऽथ मायादर्शनकौतुकी ।
लीलालासितसर्वाङ्गो लीलानिर्मलविग्रहः ॥९४॥

स्वीयपादतलोद्देशे दृष्टसामुद्रलक्षणः ।
चन्द्रस्पर्धिपादपद्मनखपंक्तिविराजितः ॥९५॥
चरणस्नायुरेखालीपुण्यसंचयदर्शनः ।
कराङ्गुलीषु जपमालाऽभयमुद्राविशेषितः ॥९६॥
करपल्लवमध्यस्थदिव्यरेखावलीयुतः ।
३५०
कराङ्गुलिनखश्रेणीविलसन्मञ्जुमौक्तिकः ॥९७॥
आजानुबाहुसुभगो सुदृढस्कन्धभासितः ।
कवाटप्रमितोदारोरःस्थलश्रीविभासितः ॥९८॥
श्रीमुखेनैव सम्पूर्णसृष्टिसौख्यसमन्वितः ।
नानावर्णविचित्रेण श्मश्रुणा चारुशोभितः ॥९९॥
विद्रुमस्पर्धिबिम्बौष्ठशोभाविस्ताऱिताऽननः ।
शुकचञ्चुसमानश्रीनासासम्पुटभास्वरः ॥१००॥
नयनद्वयमाधुर्यसम्प्लावितजगत्त्रयः ।
जगज्जटिलजालानां ललाटे संविधारकः ॥१०१॥
ललाटविस्तारमयो ललाटे सर्वदर्शकः ।
ललाटतटनेत्राऽग्निसंवारणसमाकुलः ॥१०२॥
दुर्लभः सर्वसंसारे ह्यतिदुर्लभदर्शनः ।
कुण्डलिन्याः समुद्धारे सर्वदा ससुखोद्यतः ॥१०३॥
शारीरसर्वचक्राणां परिष्कारणपण्डितः ।
मणिपूरादिचक्राणां कार्याऽकार्यनियामकः ॥१०४॥
आज्ञाचक्रप्रबन्धानां सविशेषं प्रवर्तकः ।
जाग्रत्कुण्डलिनीविद्यः सर्वत्र विहितश्रमः ॥१०५॥
भक्तवृन्दारकाणां च कुण्डलिन्याः सुधारकः ।
सिद्धान्तानां रहस्येषु लेखनीपरिचालकः ॥१०६॥
सुसिद्धान्तरहस्याख्यग्रन्थनिर्माणकारकः ।
नानाविधसुलेखेषु भक्तवृन्दैरभिष्टुतः ॥१०७॥
सारल्येन सुसौक्ष्म्येण रहस्यव्यंजनोत्सुकः ।
स्वल्पकायेषु लेखेषु रहस्यस्फोरणक्षमः ॥१०८॥
लेखसंग्रहनाम्नाऽपि ग्रन्थरत्नप्रवर्तकः ।
प्रज्ञामन्दरनिर्घोषमथितज्ञानवारिधिः ॥१०९॥
तन्त्रागमरहस्यानां स्वीयलेखविधायकः ।
वेदोपदेशनिपुणो वेदमार्गस्य देशिकः ॥१११॥

निजराष्ट्रस्य संसारगुरुत्वपरिपोषकः ।
सर्वसंसारनिर्माणनवशिक्षाप्रदायकः ॥१११॥
कोटिब्रह्माण्डजननीपदसेवामधुव्रतः ।
अध्यात्मलाभसंतुष्टोऽध्यात्ममार्गपरायणः ॥११२॥
सर्वदाऽध्यात्मगाथानामवगाहकृतादरः ।
सर्वसेवासमारम्भः सर्वपोषणतत्परः ॥११३॥
मातृसेवारतो नित्यं मातुश्चरणसेवकः ।
मातुर्मन्त्रजपासक्तो जपमार्गस्य देशिकः ॥११४॥
सच्छिष्यजपसंतुष्टो सच्छिष्यजपदेशिकः ।
जपलीलाविलासेन जाग्रत्कुण्डलिनीकथः ॥११५॥
मातुः श्रीकुण्डलिनीशक्तेर्जागरेऽद्भुतदर्शनः ।
काशीभ्रमणनिष्णातो बिहारभ्रमणोत्सुकः ॥११६॥
वंगेषु भ्रमणायत्तो नेपाले विहितश्रमः ।
असमे कृतसंचारः कामाख्यापीठसंगतः ॥११७॥
नागाप्रदेशे निखिले संचारणसुखाकृतिः ।
भूटानदेशे यात्रासु हिमालयकृतादरः ॥११८॥
उत्तरप्रदेशे सर्वत्र दर्शंदर्शं विनिर्मलः ।
मध्यदेशे राजमानो पञ्चाम्बुभ्रमणोद्यतः ॥११९॥
राजस्थाने प्रविहितानेकयात्रो यतिर्महान् ।
गुर्जरे ग्रामनगरप्रान्तान्तर्गतनिर्मलः ॥१२०॥
महाराष्ट्रेषु विख्यातो मद्रेषु विहितादरः ।
आन्ध्रप्रदेशे निरतो कर्नाटककृतालयः ॥१२१॥
केरलेषु कृतावासो सिन्धुदेशे सुसंगतः ।
तिब्बतेष्वपि विख्यातो मेधालयकृतालयः ॥१२२॥
नानासिद्धविधानेषु कृतब्रह्माण्डदर्शनः ।
बालस्वभावसंपूर्णो प्रौढेऽपि वयसि स्थितः ॥१२३॥
त्रैकालिको युवा तावदोजस्वी सर्वसंगतः ।
वाग्मी विनम्रो विनतो लक्ष्यवेधी सतां गतिः ॥१२४॥
नारदो वाग्मिवरदो शुभ्रभूपालसेवितः ।
नानापुराणमर्मज्ञो मत्स्यग्रन्थप्रवाचकः ॥१२५॥
मार्कण्डेयपुराणेन विहितागमसद्रुचिः ।
श्रीमद्भागवते देवीभागवते चापि भक्तिमान् ॥१२६॥

भविष्योत्तरसद्ग्रन्थे दिव्यधीरुत्तमः कविः ।
ब्राह्मेऽथ ब्रह्मवैवर्ते ब्रह्माण्डे चापि संयुतः ॥१२७॥
वायौ पुराणे मर्मज्ञो वैष्णवे तत्वदेशिकः ।
वाराहे वामने चापि पुराणे सुप्रतिष्ठितः ॥१२८॥
अग्निना चाऽथ सम्प्रोक्ते पुराणे सत्प्रवाचकः ।
४००
नारदीयपुराणे च पाठनिर्मलमानसः ॥१२९॥
पाद्मे पुराणे नानाखण्डयुक्ते सुभास्वरः ।
कौर्मे चाऽथ पुराणे तु कूर्मतत्वविमर्शकः ॥१३०॥
स्कान्दे पुराणे विख्यातो लिङ्गतत्वप्रपूजकः ।
गारुडेऽपि पुराणे तु नानालोकनिदर्शकः ॥१३१॥
अष्टादशपुराणेषु स्वच्छन्दः सर्ववन्दितः ।
समस्तोपपुराणानां तत्वदर्शनपण्डितः ॥१३२॥
महाभारततत्वज्ञो महाभारतवाचकः ।
भरतो नाट्यशास्त्रस्य प्रणेता शास्त्रविश्रुतः ॥१३३॥
संसारनाट्यसंस्कर्ता जगन्नाट्यविलोपकः ।
मोक्षमार्गप्रतिष्ठाता मुक्तिमार्गकृतश्रमः ॥१३४॥
पीताम्बराभगवतीकृपापीयूषनिर्मलः ।
जगन्मातुः पादपद्मप्रणामाञ्जलितत्परः ॥१३५॥
आद्यशक्तिसमाराधनाख्ये कर्मणि विश्रुतः ।
सर्वोपचारसंभारसंकीर्तनकुतूहली ॥१३६॥
सर्वाऽभयप्रदानाय जगदम्बासमर्चकः ।
विहिताशीः प्रसन्नात्मा समलोष्टाश्मकांचनः ॥१३७॥
तुल्यनिन्दास्तुतिमौनी जितवाक्कायमानसः ।
सदाशिवसमर्चासु नित्यं जागर्तिसंयुतः ॥१३८॥
ईशानपूजकः सद्योजातपूजापारायणः ।
वामदेवसमर्चासु दृष्टरुद्राऽभिषेचनः ॥१३९॥
अघोरशिवध्यानपरो ऊर्ध्वाम्नायप्रतिष्ठितः ।
कामारिः कामसंतुष्टः कामनापरिपूरणः ॥१४०॥
ज्योतिष्मतीभासमानो ज्योतिष्माञ्ज्योतिमण्डितः ।
वनखण्डेश्वराधीशप्रतिष्ठानप्रपूजकः ॥१४१॥
गद्यपद्यविनिर्माणचमत्कारचमत्कृतः ।
प्रकाशाख्यमहाभाष्यनिर्माता प्राणपोषकः ॥१४१॥

महामायारहस्यानां साक्षात्करणतत्परः ।
महामायाप्रभावानामनुभावविशारदः ॥१४३॥
कामाख्यापीठसन्देष्टा जालन्धरकृतार्चनः ।
ओड्यानपीठनिरतः सर्वपीठधुरन्धरः ॥१४४॥
पीताम्बराख्यपीठे तु सर्वपीठसमन्वितः ।
दरिद्राणां दुःखहर्ता दुःखदारिद्र्यशोषकः ॥१४५॥
४५०
ज्ञानिनामग्रगण्यस्तु ज्ञानिनामग्रपूजितः ।
बलिनां सर्वबलदो धनिनां धनदो वशी ॥१४६॥
सन्तानकामुकानां तु स्वाशीःसन्तानदायकः ।
कृपाब्धिः सुकृपाराशिः कृपाधाराप्रवर्षकः ॥१४७॥
पापकर्मप्रतीकारे भक्तानामभयङ्करः ।
जपमार्गोपदेष्टा च सिद्धमन्त्रप्रदायकः ॥१४८॥
सर्वसाम्राज्यसंसिद्धः सर्वसौभाग्यवर्षकः ।
सर्वदा सर्वदः सर्वसुषमाऽऽसनसंस्थितः ॥१४९॥
तेजोराशिरलंभूष्णुर्मानी मानवतां धनम् ।
कृतकृत्यः संप्रयोक्ता सद्धर्मोद्धारणक्षमः ॥१५०॥
शाक्तः शक्तिप्रियः शक्तिपूजानिरतमानसः ।
शाक्तमर्मोपदेष्टा च शाक्तागमविदां वरः ॥१५१॥
शक्तितत्त्वाऽनुमन्ता च शक्तिब्रह्मणि संस्थितः ।
देशकालविशेषज्ञो देशकालप्रतिष्ठितः ॥१५२॥
पूज्यानां पूजनीयश्च ज्ञानवारांनिधिर्महान् ।
समाधिभाषामर्मज्ञो समाधिनिरतः सुखी ॥१५३॥
समाधौ सर्वदुःखानामनिशं क्षयकारकः ।
सर्वोपनिषद्रूपवनसंचारकेसरी ॥१५४॥
सर्वसौख्यसमासीनः सर्वभाषाविबोधकः ।
कुण्डलिन्या जागरणे प्रवीणो नित्यमण्डितः ॥१५५॥
कुण्डलिन्याः सहस्रारप्रवेशपरिदर्शकः ।
तेजोमयांशुकपरिच्छिन्नो वाग्विशारदः ॥१५६॥
५००
सर्वतत्वमयो नित्यं सर्वलक्षणलक्षितः ।
दुर्दान्तानामपि सदा कृपया परिषिञ्चकः ॥१५७॥
भक्तिमार्गपराधीनो नित्यं भक्तिवशे स्थितः ।
लोचनोत्सवभूमिश्च हृद्यः सर्वत्र सुन्दरः ॥१५८॥

नमोवाक्सुप्रतिष्ठोऽथ नमोनारायणप्रियः ।
देवदेवः सदामोदप्रियो धर्मपरायणः ॥१५९॥
नानाशिष्यगणैः सार्धं संचारणविनोदनः ।
सर्ववेदान्तमर्मज्ञो शंकरो देशिकः स्वयम् ॥१६०॥
रामानुजोऽथ भगवान् विशिष्टाऽद्वैतसत्कथः ।
शुद्धाद्वैतकथाधारासम्प्रवर्तनवल्लभः ॥१६१॥
मध्वो वेदान्तमर्मज्ञो द्वैतगाथाप्रवर्तकः ।
सर्वदर्शनकान्तारसंचारणपटुर्महान् ॥१६२॥
वाचस्पतिस्तु भगवान् सर्वदर्शनपण्डितः ।
गंगेशो न्यायवाणीप्रवर्तनकुतूहली ॥१६३॥
कुमारिलो लसत्प्रज्ञो मीमांसासु प्रतिष्ठितः ।
मण्डनो दिव्यविद्यानां संचारणमनोहरः ॥१६४॥
कपिलः सांख्यसन्मार्गोपदेष्टा सत्कथारतः ।
ईश्वरः कृष्ण एवाऽसौ प्रसिद्धः सांख्यकारिकः ॥१६५॥
गौड़पादो भाष्यकर्ता विज्ञानादिश्च भिक्षुकः ।
मनुर्वा याज्ञवल्क्यो वा पारावार इवापरः ॥१६६॥
देवलो दीधितिः सर्वधर्मशास्त्रप्रवर्तकः ।
रामगाथानदीशुभ्रगिरिर्वाल्मीकिरेव वा ॥१३७॥
भासो नाटककर्ताऽयं नानानाटककोविदः ।
यशोनिधिः कालिदासो रसवर्षणविह्वलः ॥१६८॥
अष्टसिद्धिविशालश्रीसर्वदापरिषेवितः ।
सर्वाभिर्निधिभिः सत्यं प्रतिक्षणसमीडितः ॥१६९॥
समृद्धनेत्रकिरणप्रभाभासितदिङ्मुखः ।
सर्वथासुरसम्प्राप्तमहामायाप्रभान्वितः ॥१७०॥
इष्टमन्त्रजपप्रीतविमुक्तिकरलालितः ।
नन्दनोद्यानसंचारदिव्यतापरिमण्डितः ॥१७१॥
मातृपूजानित्यसेवासुखसारविभास्वरः ।
विपत्तिदुःखदावाग्निप्रशामनसुवारिदः ॥१७२॥
प्राणायामजपासक्तो कुण्ड़कुण्डलिनीरतः ।
पीताम्बरादिव्यपीठनन्दनोद्यानसंगतः ॥१७३॥
लोकलोकान्तराऽभीष्टगमनः सार्वदेशिकः ।
सर्वसत्कर्मनिर्देष्टा प्रसिद्धिषु पराङ्मुखः ॥१७४॥

श्रोद्दण्डमाहिषोन्मूलयित्रीपादनतः सदा ।
देशस्यास्य सदा शक्तिभक्तावायतिशिक्षकः ॥१७५॥
कुशलप्रश्नकर्ता च कुशलाचारवाञ्छनः ।
६००
सर्वदाकुशलश्रीणां प्रदाता कुशलाकुलः ॥१७६॥
मदानां विनिषेद्धा च सर्वथा मदनाशनः ।
वाममार्गकुरूपाणां लोपको दक्षिणव्रती ॥१७७॥
दक्षिणं मार्गमास्थाय सर्वसिद्धिधुरन्धरः ।
शिष्याणां दक्षिणे मार्गे सर्वनिष्ठाप्रदायकः ॥१७८॥
पशूनामिङ्गितज्ञश्च पशुभाषासु पण्डितः ।
पशुहर्षकृताऽरम्भः पशुपाशविमोचनः ॥१७९॥
कलौ युगेऽप्यत्र देशे दृष्टसत्ययुगः कृती ।
जाज्वल्यमाननिरये शीतचन्दनलेपनः ॥१८०॥
दिव्यदर्शनदानेन पापानां क्षयकारकः ।
अयाचको याचकानां प्रापिताऽशेषवैभवः ॥१८१॥
कार्यकारणभावेन संसारव्यवहारवान् ।
सर्वपूज्यः सर्वगुरुः सर्वसत्कारसेवितः ॥१८२॥
दयाब्धिसारसर्वस्वो दानदाक्षिण्यदीक्षितः ।
गीर्वाणवाणीसन्तुष्टोऽमरभाषाधुरन्धरः ॥१८३॥
निलिम्पवाक्प्रवाहेषु दृष्टः साक्षाद्बृहस्पतिः ।
संस्कृतव्यवहारेषु भक्तेषु प्रीतिवर्षकः ॥१८४॥
अन्तःकरणसंवेत्ता मनोगतिविवेचकः ।
बाह्याचारेषु सुप्तोऽपि मानसे पूर्णजागृतः ॥१८५॥
सर्वोपचारसंपूज्यो सर्वदेवनमस्कृतः ।
पीताम्बराभगवतीप्रसादपरिदीपितः ॥१८६॥
पापात्मनां प्राणदानोद्यतो पापप्रणोदनः ।
श्रद्धागलितबाष्पालीसंक्षालितपदद्वयः ॥१८७॥
विविक्तदेशसत्पीठसंस्थापनकृतोत्सवः ।
वनखण्डीश्वराऽवाप्तानुज्ञाकीर्तितदिक्छटः ॥१८८॥
पीठभ्रमणवेलासु कृताश्वत्थामदर्शनः ।
विहिताश्वत्थामवार्तः शोभनाशीर्विभूषितः ॥१८९॥
हनूमता भगवता कृतवार्तः सुविह्वलः ।
हनूमत्प्रतिमानाञ्च कृतप्राणप्रजागरः ॥१९०॥

पञ्चानां शिवमूर्तीनां प्राणस्थापननिर्मलः ।
दिगम्बरे तनौ कालभैरवे पूजनाञ्चितः ॥१९१॥
गणेशार्चनसन्तुष्टो गणेशार्पितमानसः ।
श्रीमन्महागणपतिप्रवणः कृतिनांवरः ॥१९२॥
श्रीमत्परशुरामस्य प्रतिमापूजनोन्मुखः ।
६५०
गुरुमण्डलविन्यासकृताऽवाससुनिश्चलः ॥१९३॥
पृथिव्यामेकमात्रश्रीगुरुमण्डलमध्यगः ।
विनयौदार्यसम्पन्नसागरैः परिवेष्टितः ॥१९४॥
सागराचारसन्तुष्टो सागराशीःप्रवर्षकः ।
ललितालालितो नित्यं ललिताश्रीसुमण्डितः ॥१९५॥
सूर्यवद्भासमानोऽथ सूर्यसेवावशीकृतः ।
सूर्यदेववशीकारे विहिताऽनेककौतुकः ॥१९६॥
गार्हस्थ्ये नित्यसक्तानां भक्तानामभयङ्करः ।
गृहस्थाश्रमसन्तुष्टोऽप्यगृहस्थः शुचिवृतः ॥१९७॥
गार्हस्थ्यबाधाशमनो सर्गपापविनाशकः ।
पीताम्बराप्रीतिमयो बगलाध्यानपूरितः ॥१९८॥
धूमाचरणरेणुश्रीकणिकाऽवर्तनोत्सुकः ।
केतकीकलितोदारकादम्बालीविनिर्मलः ॥१९९॥
दिव्यश्रीरामसन्तुष्टो नारायणजपादृतः ।
धूमादुःसाध्यपूजासु कृतभूरिपरिश्रमः ॥२००॥
श्रीयन्त्रवरिवस्याया रहस्ये नित्यजागृतः ।
इष्टमन्त्रजपप्रीतः सर्वत्रेष्टप्रदायकः ॥२०१॥
नित्यं निर्मलभावानां परिपोषणतत्परः ।
सम्पूर्णो मानवो देवः सम्पूर्णः सर्वसुन्दरः ॥२०२॥
पीताम्बराभगवतीभावनाभाविताऽन्तरः ।
काञ्चनप्रतिमःकाये रसनारजताकृतिः ॥२०३॥
प्रेम्णा वशीकृताऽशेषविश्वो राष्ट्रधुरन्धरः ।
राणाप्रतापसच्छौर्यवर्णने वीरतायुतः ॥२०४॥
शिववीरखड्गधारावर्णने प्रथितादरः ।
सच्चिदानन्दरूपोऽथ सर्वनिष्फलनाशकः ॥२०५॥
सनातनस्य धर्मस्य रक्षकः परिपालकः ।
नानाऽवतारसंवादी नानाव्याख्याननिर्मलः ॥२०६॥

तन्त्राणामुच्चशिखरे समारोहणसत्कृतः ।
कराग्रामलकीभूतविश्वो भूतिविभूषितः ॥२०७॥
कृतगंगानदीस्नानो यमुनास्नाननिर्मलः ।
नर्मदाया वेगवत्ताविधारणसमुद्यतः ॥२०८॥
ब्रह्मपुत्रकृतानन्दः कावेरीतोयनिर्मलः ।
गोमतीस्नानसुप्रीतो वितस्तातरणोद्यतः ॥२०९॥
७५२०
चन्द्रभागाकृतस्नानः शतद्रुपयसा स्नुतः ।
पयोष्णीपानरसिको सिन्धुस्नानविनिर्मलः ॥२११॥
कोसीकृतादरो चर्मण्वतीवारिसमाप्लुतः ।
साबर्मतीकृतस्नेहो त्रिवेणीप्रथितादरः ॥२११॥
सरस्वतीस्नानतुष्टो गोदावारिकृताह्निकः ।
सर्वेष्वपि समुद्रेष्वभिषेकसुभास्वरः ॥२१२॥
वेदवादरतो नित्यं तन्त्रवादमयः सदा ।
राष्ट्रवादी चार्यवादी शुभ्रसत्कार्यवादकः ॥२१३॥
असत्कार्यस्य वादी च ब्रह्मवादी निरञ्जनः ।
मायावादी द्वैतवादी विशिष्टाद्वैतवादकः ॥२१४॥
शुद्धाद्वैतस्य प्रवादी द्वैताद्वैतप्रवादकः ।
अचिन्त्यभेदाभेदवादी सर्वदाऽऽरम्भवादकः ॥२१५॥
परिणामविवर्ताख्यवादयोः सुप्रतिष्ठितः ।
परमाणुवादनिष्णातो शाक्ताऽद्वैतस्य वादकः ॥२१६॥
सिद्धान्तवादी सततं सर्वसिद्धान्तपोषकः ।
छायावादरहस्याख्यवादानां मर्मकोविदः ॥२१७॥
प्रतीकवादमर्मज्ञो विज्ञानस्यापि वादकः ।
आधुनिके साम्यवादे पुराणत्वविघोषकः ॥२१८॥
समाजवादमर्मज्ञो सर्ववादरहस्यवित् ।
शून्यवादस्य निर्देष्टा शून्यवादनियामकः ॥२१९॥
पीताम्बरासर्ववादजननीपदसंगतः ।
श्रीलोकमान्यतिलकप्रशंसापरमोत्सुकः ॥२२०॥
मोतीलालमहामान्यो लालपालप्रपूजितः ।
सुभाषाशीःप्रदाता च भक्तसिंहनिदेशकः ॥२२१॥
आजादाहुतिसन्दीप्तो स्वातन्त्र्योद्घोषतत्परः ।
महात्मगांधिविनतो जवाहरसमर्चितः ॥२२२॥

श्रीराजेन्द्रप्रसादेन सुखपूर्वं सभाजितः ।
अधार्मिकमहाशत्रुजिह्वाकीलनभैरवः ॥२२३॥
धर्मसाम्राज्यसंस्थानसंस्थापनसमुद्यतः ।
मानुषाख्यमहाधर्मदीक्षितान्तरनिर्मलः ॥२६४॥
सर्वदर्शनकान्तारसुसंचारणकेसरी ।
केसरीदर्शनः सिंहविक्रमःसिंहसेवितः ॥२२५॥
सिंहासनसमारूढो राष्ट्रसिंहत्वदीपकः ।
मातुः श्रीसिंहवाहिन्याः प्रणतःपादपद्मयोः ॥२२६॥
जन्मसाफल्यसद्दीक्षाव्रतदानमहोज्ज्वलः ।
प्राणिमात्रसुसंसेव्यो प्राणिमात्रकृताऽदरः ॥२२७॥
व्यालमालाधरो व्यालालवालान्तरभूरुहः ।
श्वानयोनिस्थजीवात्मप्रीतिविह्वलमानसः ॥२२८॥
मरालकोकिलोदारसारसालिसमीड़ितः ।
सिंहव्याघ्राऽनुप्रयातो शिवाबलिनियामकः ॥२२९॥
सर्वकीटपतङ्गानां परिपालनसोत्सुकः ।
माणिद्वीपनिवासेन सर्वथा लसितान्तरः ॥२३०॥
मणिद्वीपाऽवासकारी देवीपीताऽम्बरार्पितः ।
नवप्रभाप्रभावाभिरामरमणीयुतः ॥२३१॥
आजन्मब्रह्मचारित्वे मतो भीष्मपितामहः ।
सर्वशस्त्रास्त्रविद्यासु द्रोणाचार्यो व्यवस्थितः ॥२३२॥
दुर्दान्तदस्युदलने नित्यं परशुधारकः ।
रामकार्यसुसिद्ध्यर्थं हनूमान् शुभसंचरः ॥२३३॥
परस्परविरुद्धेषु सत्त्वेषु प्रीतिवर्धनः ।
कलौ युगे सत्ययुगो त्रेताद्वापरवर्णितः ॥२३४॥
महाकालकालकालकूटस्थः कालवन्दितः ।
शिवाऽरूढमहाकालीवन्दनाविह्वलान्तरः ॥२३५॥
सर्वधर्मसमानत्वे सम्राडकबरशंसकः ।
नीरक्षीरविवेकाख्यहंसत्वे सुप्रतिष्ठितः ॥२३६॥
प्राचीनं मार्गमास्थाय नवीने प्रथितादरः ।
तपः स्वाध्यायनिरतो नवविज्ञानशंसकः ॥२३७॥
विज्ञानयन्त्रमर्मज्ञो विज्ञाने प्रथितादरः ।
सर्वविज्ञानसंवादी तत्त्ववेत्ता चिरन्तनः ॥२३८॥

एतद्देशस्य विद्यानां रत्नाकर इवाऽपरः ।
एतद्देशप्रसूतस्य सर्वश्रेष्ठत्वघोषकः ॥२३९॥
एतद्देशस्य कणिकाजगद्वन्द्यत्वपोषकः ।
एतद्देशस्य नगरग्रामवासिप्रपूजकः ॥२४०॥
एतद्देशप्राक्पुरुषस्त्रीबालकसमादरः ।
एतद्देशस्य वर्णानामाश्रमाणां कृतादरः ॥२४१॥
८५०
सर्वोच्चवर्णसंस्थश्च सर्वोच्चाश्रमसंस्थितः ।
सर्वोच्चशिखरारूढ़ः सर्वप्राणि प्रियंवदः ॥२४२॥
दिवि भुव्यन्तरिक्षे च सर्वश्रेष्ठत्वसंगतः ।
पीताम्बरापादपद्मरेणुश्रीभिर्विमोहितः ॥२४३॥
जगत्प्रसूतिकमलाचरणाम्बुजनिर्भरः ।
चिरन्तनसमृद्धश्च नित्यं नवनवाऽकृतिः ॥२४४॥
शंकराचार्यवर्यैश्च सर्वैरपि समीड़ितः ।
रामानुजाचार्यवर्यैः सविशेषं समादृतः ॥२४५॥
मध्वाचार्यार्चितस्तावद् गोस्वामिभिरभीप्सितः ।
आर्यसामाजिकैस्तावत्सर्वथा साधु संस्तुतः ॥२४६॥
सर्वधार्मिकसंस्थानहृदयादरधारकः ।
गुरुद्वारादरमयो मस्जिदादरकारकः ॥२४७॥
मन्दिरादरकर्ता च गिरजाऽदरकारकः ।
ब्राह्मसमाजे विख्यातो कबीरमार्गसुन्दरः ॥२४८॥
दादूकृतादरस्तावत् रैदासविहितादरः ।
ब्राह्मणक्षत्रियविशां शूद्राणां प्रीतिविह्वलः ॥२४९॥
शाक्तागमसुसक्तानां नित्यं प्राण इवापरः ।
विहारमठपीठानामादरे विहिताञ्जलिः ॥२५०॥
सर्वपूजापद्धतीनां तत्त्वनिष्ठोपदेशकः ।
दोषाख्यविषसंचारमन्त्रौषधमयः सदा ॥२५१॥
करुणामयसंसाररचनाचारुपण्डितः ।
शब्दकोशे नकाराख्यशब्दलोपकरोऽखिलः ॥२५२॥
सर्वथाऽस्तित्वसंवादी सर्वास्तिकवशंवदः ।
नीचानामपि सत्त्वानां जपेनोच्चत्वकारकः ॥२५३॥
संसारसागरोत्तारजययाननिदर्शकः ।
अनन्तकोटिब्रह्माण्डजननीनित्यसेवकः ॥२५४॥

हेडगेवारनतस्तावद् गोलवल्करसमादृतः ।
मौलवीसम्मतस्तावत् पादरीप्रथितादरः ॥५५॥
सर्वथाश्चर्यभावानामालयत्वे प्रतिष्ठितः ।
तैलंगस्वामिनिरतो कीनारामकृतादरः ॥२५६॥
गौरांगप्रभुसिद्धान्तसेवासु समुपस्थितः
श्रीरामकृष्णपरमो विवेकानन्दशंसकः ॥२५७॥
समर्थश्रीरामदाससामर्थ्योल्लसितान्तरः ।
गुरुगोविन्दसिंहस्य भावनाविहितादरः ॥२५८॥
महात्मनागान्धिना वै दतियाऽन्दोलने नतः ।
काटजूपाधियुक्तेन कैलासेन समीडितः ॥२५९॥
सर्वदर्शननिष्णातसम्पूर्णानन्दवन्दितः ।
सर्वपल्लीतिविख्यातराधकृष्णन् समादृतः ॥२६०॥
कमलापतिनिर्ध्यातः करुणापतिपूजितः ।
चेन्नारेड्डिवरेणाऽर्घ्यदानमानप्रपूजितः ॥२६१॥
विद्याभवननिर्मात्रा मुन्शिना विहिताञ्जलिः ।
चतुर्भुजसमाश्लिष्टचरणद्वन्द्वनिश्चलः ॥२६२॥
राज्यपालदयालान्तप्रणतोद्भासितान्तरः ।
प्रधानमन्त्रीन्दिरया पीठभ्रमणपूजितः ॥२६३॥
ब्रह्मर्षिमालवीयेन हृदये सुप्रतिष्ठितः ।
श्रीमद्हरिहरानन्दकरपात्रस्वामिवन्दितः ॥२६४॥
सुमेरुशंकराचार्यशंकरानन्दवन्दितः ।
द्वारिकाशंकराचार्यस्वरूपानन्दसेवितः ॥२६५॥
स्वामिभागवतानन्दसपर्यासेवितान्तरः ।
श्रीसत्यमित्रानन्दाख्यस्वामिवर्यविशेषितः ॥२६६॥
श्रीमतीविजयाराजेसिन्धिया समभिष्टुतः ।
रविशंकरशुक्लेन वन्दितः सूक्ष्मदर्शिना ॥२६७॥
विद्याचरणशुक्लेन साधुवादैः सुसत्कृतः ।
श्यामाचरणशुक्लेन चरणध्याननन्दितः ॥२६८॥
श्रीमताऽर्जुनसिंहेन सर्वभावेन पूजितः ।
सम्पूजित एवासीत् श्रीचतुर्भुजशर्मणा ॥२६९॥
मुख्यमन्त्रिश्रीपतिना नैकवारं कृतस्तवः ।
महामहोपाध्यगिरिधरशर्मवन्दितः ॥२७०॥
महामहोपाध्यायगोपीनाथसुखाकरः ।

महामहोपाध्यायोमेशमिश्रनमस्कृतः ॥२७१॥
प्रभूदयालाग्निहोत्रिविद्वद्वरसमर्चितः ।
विद्यानिवाससुप्रीतो राममूर्तिकृतादरः ॥२७२॥
रेवाप्रसादप्रणतो देवीदत्तनमस्कृतः ।
रामनाथेन वेदप्रवणेन निवेदितः ॥२७३॥
सुब्रह्मण्येनविदुषा सर्वासननमस्कृतः ।
श्रीरमापतिशुक्लेन नानारूपे समर्चितः ॥२७४॥
रामनारायणध्यातो वैद्यनाथसुसेवितः ।
शिवनाथेन नम्रेण भक्तिभावनया स्तुतः ॥२७५॥
शिवनाथस्य नम्रस्य सर्वाभीष्ट प्रदायकः ।
सर्वथा समनुध्यात सूर्यदेवेन शर्मणा ॥२७६॥
नित्यमद्यापि ललिताप्रसादेन सुसेवितः ।
कुधौलियाख्यकृष्णानन्दवर्यसमेधितः ॥२७७॥
रेवारामस्य संगीतशिक्षादीक्षाविधायकः ।
नारायणाख्यसिंहस्य हृदये सुव्यवस्थित. । २७८॥
राणाख्यशमशेरश्रीजंगबहादुरर्चचितः ।
शास्त्रार्थमहारथिश्रीमाधवाचार्यवन्दितः ॥२७९॥
श्रीमदोङ्कारनाथेन ठाकुरेण समीडितः ।
संगीतविद्यानिष्णातश्रीबृहस्पतिसेवितः ॥२८०॥
श्रीसुधाकरशुक्लेन रसकाव्यैः समर्चितः ।
बदनाख्येनसिंहेन ग्रथिताऽनेककौतुकः ॥२८१॥
कलकत्तास्थश्रीवेणीशंकरशर्मपूजितः ।
श्रीमतापरिपूर्णानन्देनाथसुवन्दितः ॥२८२॥
हनूमानप्रसादेन पोद्दारेण समर्चितः ।
वाजपेयिप्रवरश्रीकिशोरीदासपूजितः ॥२८.॥
श्रीवृन्दावनलालेन वर्मणा चारुनन्दितः ।
देवीदत्तेन शुक्लेन सविशेषं वशीकृतः ॥२८४॥
दुर्गादत्ताख्यविबुधप्रपूजननस्मकृतः ।
बलवीराख्यसिंहस्य स्वामित्वे सुव्यवस्थितः ॥२८५॥
वासुदेवाख्यगोस्वमिप्रकर्षाऽनुप्रमाणितः ।
श्रीयोगेशसमाराध्यो भोलानाथसमर्चितः ॥२८३॥
श्रीनिवासेनमिश्रेण सत्कारैरभिरञ्जितः ।

मोतीलालेन रङ्गनाथपाठकेन सुशोभितः ॥२८७॥
बाबूरामाह्वयेनाथ सेवया स्ववशीकृतः ।
श्रीबाबूलालगुप्तेन पंचाङ्गेषु सुसत्कृतः ॥२८८॥
व्रजनन्दनविन्यासप्रमाणप्रीतिविह्वलः ।
ओंनारायणवर्येण प्रणामैर्विवशीकृतः ॥२८९॥
श्रीकालूशास्त्रिणा नानास्तुतिभिः समभिष्टुतः ।
रामेश्वरदयालेन नानाभावैः प्रपूजितः ॥२९०॥
गुदईमहाराजेन प्रणतः सर्वशोभनः ।
सर्वथाविहितावासः स्वान्ते डागरबन्धुना ॥२९१॥
कुमारगन्धर्वमयः सियारामसुसेवितः ।
वन्द्योपाध्यायनिखिलश्रीमदभ्यर्चितान्तरः ॥२९२॥
एनुद्दीनेन मनसा कायेन च कृताञ्जलिः ।
'मामा' ह्वायाय मल्लानां विद्यायाः सम्प्रकाशकः ॥२९३॥
तोतारामेण विदुषा सेवासर्वस्वसंयुतः ।
सूर्यप्रकाशगोस्वामिप्रवरेणाभिसंस्तुतः ॥२९४॥
मोहनलालचतुर्वेदिप्रवरकृतसन्नतिः ।
देवीसहायविजयध्वनि भिर्मुदितान्तरः ॥२९५॥
लक्ष्मीकान्तलसच्छ्रीको विश्वनाथसमीडितः ।
कैलासवासुदेवश्रीगोस्वामिनमितः सदा ॥२९६॥
अम्बाप्रसादप्रेमशंकरसिंहसमीडितः ।
शिवस्वरूपे विनतो मनमस्तत्रिपाठिना ॥२९७॥
देवकीनन्दनेनाथ श्रद्धापुष्पसुपूजितः ।
दिव्यानन्दस्वामिवरेणापि श्रद्धासमान्वितः ॥२९८॥
चिकित्सकधुरीणश्रीवेणीमाधवार्चितः ।
राधेश्यामनुतो मथुरादासप्रणतिपूजितः ।२९९॥
शुकरत्ननुतः कामं राजनेन सभाजितः ।
रविशंकरसंमान्यो मधुपेन निवेदितः ॥३००॥
१०००
शिवमन्दिरसत्प्रीतिर्नरसिंहप्रणामवान् ।
शरणान्तशिवेनाथ भक्तिभावनया नुतः ॥३०१॥
सुषमापूजितो भगवत्स्वरूपेण सुसंनतः ।
हृदयेशेन हृदये कृतसाधुसमर्चनः ॥३०२॥
बाबूलालेन विनतो राजेन्द्रेण प्रपूजितः ।

रामकृष्णेन विनतो हरिशेन नमस्कृतः ॥३०३॥
शृंगीऋषिवरेणाथ सर्वसत्कारभास्वरः ।
प्रेमनारायणस्तुत्यः किशोरीशरणानतः ॥३०४॥
श्रीमन्माणिकचन्द्रेण जपनिष्ठेन पूजितः ।
व्रजवल्लभनिध्यातो हरिरामसुसेवितः ॥३०५॥
श्यामसुन्दरवर्येण वीरेन्द्रेण च संनतः ।
मथुरास्थेन मदनमोहनेन समीडितः ॥३०६॥
गोस्वामिश्रीलक्ष्मणकिशोरेण समर्चितः ।
श्रीप्रकाशेन चैवाथ शिवदत्तेन संनतः ॥३०७॥
रघुवीरशरणेनाथ प्रजानाथेन सत्कृतः ।
रत्नसिंहरमानाथकेदारैः समभिष्टुतः ॥३०८॥
श्रीदीनबन्धुकोठारीहरनारायणपूजितः ।
हेमचन्द्रेण च फकीरादिचन्द्रेण मानितः ॥३०९॥
श्रीमता राववर्येण राजेन्द्रेणापि चार्चितः ।
विनतो रामकृष्णाभ्यां दयालुप्रभुणार्चितः ॥३१०॥
प्रयागनारायणमहाभागेनाथप्रपूजितः ।
कन्हैलालयोगेश्वरप्रसादपरिकांक्षितः ॥३११॥
नतश्चन्द्रप्रकाशाभ्यां मदनेन सभाजितः ।
शिवाऽनुभवविस्तीर्णो गौरीशंकरवन्दितः ॥३१२॥
कवीश्वराण्णाविनतो कृष्णरायप्रपूजितः ।
'मानवा' राधितः कीर्तिदेवशुक्लसमर्चितः ॥३१३॥
श्रीठाकुरप्रसादेन जगन्नाथेन चार्चितः ।
महेशनाथप्रणतो सीतारामकृतार्चनः ॥३१४॥
रमेशेन्द्रमणिभ्यां च वाक्यपुष्पैः प्रपूजितः ।
गजराजेन सिंहेन सादरं परिपूजितः ॥३१५॥
संगीतया गुलाबदेव्या श्यामादेव्या च संस्तुतः ।
हरिमोहनलालेन मुन्नेखांख्येन चार्चितः ॥३१६॥
प्रकाशमोहनेनाथ सत्यदेवेन वन्दितः ।
श्रीबाबूरामिश्रेण पाठकेनापि तर्पितः ॥३१७॥
गोपालदासमिश्रेण तथा भण्डारिणार्चितः ।
भगवानेन दासेन केवटेन समर्चितः ॥३१८॥
भोलानाथनुतो नित्यं सर्वं विक्रमपूजितः ।

राधारमणदुर्वारपूजितो शारदेन्दुना ॥३१९॥
मोतीलालनतः श्यामाचरणेनसुवन्दितः ।
लालगोपालविनतो कादम्बीप्रणतः सदा ॥३२०॥
दयाशंकरवर्येण जगदीशेन चार्चितः ।
रघुवीरेणसिंहेन राणाख्येन समर्चितः ॥३२१॥
अनेकानेकभक्तानां वृन्दैर्नतपदद्वयः ।
स्मृतिमात्रेण सर्वेषां शुभकर्ता च शंसकः ॥३२२॥

फलश्रुतिः

य इदं पठति स्तोत्रं श्रीमद्राष्ट्रगुरोःपरम् ।
तस्य पापानशेषांस्तु हन्याद् राष्ट्रगुरुःस्वयम् ॥३२३॥
तेषां सिद्धिः करस्थैव सर्वथा नाऽत्र संशयः ।
श्रीमद्गुरुप्रभावेण शुभमेव प्रजायते ॥३२४॥
अशुभं दूरतो यति कल्याणं चोपपद्यते ।
सर्वत्रविजयीस्याद्वै नरो गुरुसमर्चनात् ॥३२५॥

इति राष्ट्रगुरुश्रीपीताम्बरापीठाधीश्वरस्वामिप्रवरचरणचञ्चरीकेण-शिवदत्तशर्मचतुर्वेदेन श्रीराष्ट्रगुरुप्रसादाल्लब्धं श्रीराष्ट्रगुरुसहस्रनामस्तोत्रं सम्पूर्णम्—।